विद्या भवन बालिका विद्यापीठ लखीसराय

वर्ग अष्टम् विषय संस्कृत शिक्षक श्यामउदय सिंह

ता:९/११/२०२० (एन.सी.ई.आर.टी.पर आधारित)

पाठ: द्वादश: पाठनाम पुनर्मूषिको भव

***१.कथाक्रमानुसारेण वाक्यानि संयोज्य पुनः लिखत –***

(क) एक: बिडाल: मूषकं खादितुम् ऐच्छत् ।

(ख) एवमेव मुनि: तं कुक्कुरं व्याघ्रम् च अकरोत् ।

(ग) एक: महातपा मुनि: आसीत् ।

(घ) जना: अपि व्याघ्रस्य इतिहासं ज्ञात्वा मुनिं प्रशंसन्ति ।

(ङ)मुनि: मूषकं बिडालम् अकरोत् ।

(च)अनेन क्रुद्ध:व्याघ्र: मुनिम् आक्रमत् ।

(छ)मुनि:व्याघ्रमपि 'मूषकोऽयम्' इति भावेन पश्यति ।

(ज) स: काकात् एकं मूषकशावकं अरक्षत् ।

***२.पूर्णवाक्येन उत्तरत –***

(क)जना: व्याघ्रस्य विषये किं वदन्ति स्म ?

(ख) मूषक: मुने: अङ्कं किमर्थं प्राविशत् ?

(ग)मुनि: व्याघ्रं कथं पश्यति ?

(घ)अनया कथया का शिक्षा प्राप्यते ?

(ङ) नीचेषु कृतम् उपकारम् कथम् इव व्यर्थं गच्छति?